अध्यायः 12


# घातांकः घातश्च

## 12.1 भूमिका

किं भवन्तः जानन्ति ?

पृथिव्याः द्रव्यमानं 5,970,000,000,000,000,000,000,000 किलो. परिमितम् अस्ति। वयं गतकक्ष्यासु पूर्वम् एव पठितवन्तः यत् एतादृश्याः बृहत् सङ्ख्यायाः (अत्यन्त-सौविध्यार्थम्) लेखनार्थं कथं घाताङ्कानाम् उपयोगः क्रियते यथा $5.97 \times 10^{24}$ किलोग्रामपरिमितम्।

वयं$10^{24}$ इति 10 इत्यस्य घातः 24 इति पठामः।




वयं कथयामः यत् 10 इत्यस्य घातः 24।

वयं जानीमः $2^5=2\times2\times2\times2\times2$

तथा $2^m=2\times2\times2\times2\ldots\times2\times2$ (m वारम्)

$2^{-2}$ कस्य समानम् अस्ति इति वयं जानीयाम ?

अत्र घाताङ्कः ऋणात्मक-परिमेय-संख्या अस्ति।

## 12.2 ऋणात्मक-घाताङ्कानां घातः

भवन्तः जानन्ति यत् $10^2=10\times10=100$

$10^1=10=\frac{100}{10}$

$10^0=1=\frac{10}{10}$

$10^{-1}=?$

उपरितनं प्रतिरूपम् अग्रे सारयन्तः

वयं प्राप्नुमः $10^{-1}=\frac{1}{10}$

यदा घातांकः 1 इत्यतः न्यूनः भवति तदा मानं पूर्वमानस्य $\frac{1}{10}$ भागः भवति।

एवमेव $10^{-2}=\frac{1}{10}\div10=\frac{1}{10}\times\frac{1}{10}=\frac{1}{100}=\frac{1}{10^2}$

$10^{-3}=\frac{1}{100}\div10=\frac{1}{100}\times\frac{1}{10}=\frac{1}{1000}=\frac{1}{10^3}$।

$10^{-10}$ कस्य समानः अस्ति ?

निम्नलिखितान् जानन्तु।



$3^3=3\times3\times3=27$

$3^2=3\times3=9=\frac{27}{3}$

$3^1=3=\frac{9}{3}$

$3^0=1=\frac{3}{3}$

संख्या 3 आधारेण विभाजिता।

एवं प्रकारेण उपर्युक्त-प्रतिरूपं दृष्ट्वा वयं कथयामः

$$3^{-1}=1\div3=\frac{1}{3}$$

$$3^{-2}=\frac{1}{3}\div3=\frac{1}{3\times3}=\frac{1}{3^2}$$

$$3^{-3}=\frac{1}{3^2}\div3=\frac{1}{3^2}\times\frac{1}{3}=\frac{1}{3^3}$$

एवमेव $2^{-2}$ इत्यनेन भवन्तः पुनः प्राप्तुं शक्नुवन्ति।

$10^{-2}=\frac{1}{10^2}$ अथवा $10^2=\frac{1}{10^{-2}}$

$10^{-3}=\frac{1}{10^3}$ अथवा $10^3=\frac{1}{10^{-3}}$

$3^{-2}=\frac{1}{3^2}$ अथवा $3^2=\frac{1}{3^{-2}}$ इत्यादिः।

साधारणतया वयं कथयितुं शक्नुमः यत् कस्याः अपि शून्येतर-परिमेय-संख्यायाः a इत्यस्य कृते $a^{-m}=\frac{1}{a^m}$, यत्र m एका धनात्मक-परिमेय-संख्या अस्ति। $a^{-m}$, $a^m$ इत्यस्य गुणात्मकः प्रतिलोमः अस्ति।



**प्रयत्नं कुर्वन्तु**

गुणात्मकं प्रतिलोमं लिखन्तु

(i) $2^{-4}$ (ii) $10^{-5}$ (iii) $7^{-2}$ (iv) $5^{-3}$ (v) $10^{-100}$

$10^{-1}=\frac{1}{10}$

$10^{-2}=\frac{1}{10^2}=\frac{1}{100}$

वयं शिक्षितवन्तः यत् संख्यां विस्तारित-घाताङ्करूपेण कथं लेखितुं शक्नुमः यथा

$1425=1\times10^3+4\times10^2+2\times10^1+5\times10^0$

साम्प्रतं वयं पश्येम यत् 1425.36 इति विस्तारितरूपेण कथं वक्तुं शक्नुमः।

वयं जानीमः यत् $1425=1\times1000+4\times100+2\times10+5\times1+\frac{3}{10}+\frac{6}{100}$

$=1\times10^3+4\times10^2+2\times10+5\times1+3\times10^{-1}+6\times10^{-2}$

**प्रयत्नं कुर्वन्तु**

घाताङ्कानाम् उपयोगं कुर्वन्तः निम्नान् विस्तारितरूपेण लिखन्तु।

(i) 1025.63 (ii) 1256.249

## 12.3 घाताङ्कस्य नियमः

वयं शिक्षितवन्तः यत् काऽपि शून्येतर-परिमेय-संख्या a इत्यस्याः कृते $a^m \times a^n = a^{(m+n)}$, यत्र m तथा n प्राकृतसंख्ये स्तः यदि घाताङ्कः ऋणात्मकः अस्ति तदाऽपि एषः नियमः किं सत्यपूर्णः अस्ति ? अस्माभिः अन्वेष्टव्यम्।

वयं जानीमः यत् $2^{-3} = \frac{1}{2^3}$ तथा $2^{-2} = \frac{1}{2^2}$

$a^{-m} = \frac{1}{a^m}$ काचित् शून्येतर-परिमेयसंख्या a इत्यस्य कृते।

अतः $2^{-3} \times 2^{-2} = \frac{1}{2^3} \times \frac{1}{2^2} = \frac{1}{2^3 \times 2^2} = \frac{1}{2^3+2} = 2^{-5}$

-5 इति -3 तथा -2 इति घाताङ्कद्वयोः योगः अस्ति।

$(-3)^{-4} \times (-3)^{-3}$ इति ग्रहणे सति।

$(-3)^{-4} \times (-3)^{-3}) = \frac{1}{(-3)^4} \times \frac{1}{(-3)^3}$

$\frac{1}{(-3)^{-4} \times (-3)^{-3}} = \frac{1}{(-3)^{4+3}} = (-3)^{-7}$

(-4)+(-3)=-7

अधुना $5^{-2} \times 5^4$ इति लिखन्तु।

$5^{-2} \times 5^4 = \frac{1}{5^2} \times 5^4 = \frac{5^4}{5^2} = 5^{4-2} = 5^{(2)}$

(-2)+4=2

सप्तमी-कक्ष्यायाम् एव भवान् पठितवान् यत् कस्मैचित् a इति अशून्य-पूर्णाङ्काय $\frac{a^m}{a^n} = a^{m-n}$, यत्र m, n तु प्राकृत-सङ्ख्याः तथा m > n.

साम्प्रतं $(-5)^{-4} \times (-5)^2$ इति जानन्तु।

$(-5)^{-4}) \times (-5)^2 = \frac{1}{(-5)^4} \times (-5)^2 = \frac{(-5)^2}{(-5)^4} = \frac{1}{(-5)^4 \times (-5)^{-2}}$

$= \frac{1}{(-5)^{4-2}} = (-5)^{-(-2)}$

(-4)+2=-2

साधारणतया वयं कथयितुं शक्नुमः यत् कस्याः अपि शून्येतर-परिमेय-संख्यायाः a इत्यस्याः कृते $a^m \times a^n = a^{m+n}$, यत्र m तथा n पुर्णाङ्क-संख्ये स्तः।

### प्रयत्नं कुर्वन्तु

घाताङ्क-रूपाणि सरलं कुर्वन्तु तथा लिखन्तु।

(i) $(-2)^{-3} \times (-2)^{-4}$ (ii) $p^3 \times p^{-10}$ (iii) $3^2 \times 3^{-5} \times 3^6$



एवमेव भवन्तः निम्न-घाताङ्कानां नियमान् सत्यापितं कर्तुं शक्नुवन्ति यत्र a तथा b शून्येतर-परिमेय-संख्ये स्तः तथा m,n कश्चित् पूर्णाङ्कः अस्ति।

(i) $\frac{a^m}{a^n} = a^{m-n}$ (ii) $(a^m)^n = a^{mn}$ (iii) $a^m \times b^m = (ab)^m$

(iv) $\frac{a^m}{b^m} = \left(\frac{a}{b}\right)^m$ (v) $a^0 = 1$

एतान् नियमान् भवन्तः सप्तम-कक्ष्यायां धनात्मक-घाताङ्कान् अपि शिक्षितवन्तः।

आगच्छन्तु, उपरोक्त-घाताङ्कानाम् उपयोगं कुर्वन्तः केषाञ्चन उदाहरणानां समाधानं कुर्मः।

**उदाहरणम् 1** मानं जानन्तु।

$2^{-3}$ (ii) $\frac{1}{3^{-2}}$



**समाधानम्**

(i) $2^{-3}=\frac{1}{2^3}=\frac{1}{8}$ (ii) $\frac{1}{3^{-2}}=3^2=3\times3=9$

**उदाहरणम् 2** सरलं कुर्वन्तु

(i) $(-4)^5\times(-4)^{-10}$ (ii) $2^5\div2^{-6}$

**समाधानम्**

(i) $(-4)^5\times(-4)^{-10}=(-4)^{(5-10)}=(-4)^{-5}=\frac{1}{(-4)^5}$ ($a^m\times a^n=a^{m+n}$ तथा $a^{-m}=\frac{1}{a^m}$)

(ii) $2^5\div2^{-6}=2^{5-(-6)}=2^{11}$ ($a^m\div a^n=a^{m-n}$)

**उदाहरणम् 3** $4^{-3}$ इति घातम् तथा अस्य आधारं 2 इत्यस्य रूपे लिखन्तु।

**समाधानम्** वयं जानीमः $4=2\times2=2^2$

अतः $(4)^{-3}=(2\times2)^{-3}=(2^2)^{-3}=2^{2\times(-3)}=2^{-6}$ $[(a^m)^n=a^{mn}]$

**उदाहरणम् 4** सरलं कुर्वन्तु तथा उत्तरं घाताङ्क-रूपे लिखन्तु।

(i) $(2^5\div2^8)^5\times2^{-5}$ (ii) $(-4)^{-3}\times(5)^{-3}\times(-5)^{-3}$

(iii) $\frac{1}{8}\times(3)^{-3}$ (iv) $(-3)^4\times(\frac{5}{3})^4$

**समाधानम्**

(i) $(2^5\div2^8)^5\times2^{-5}=(2^{5-8})^5\times2^{-5}=(2^{-3})^5\times2^{-5}=2^{-15-5}=2^{-20}=\frac{1}{2^{20}}$

(ii) $(-4)^{-3}\times(5)^{-3}\times(-5)^{-3}=[(-4)\times5\times(-5)]^{-3}=[100]^{-3}=\frac{1}{100^3}$

[नियमेन $a^m\times b^m=(ab)^m$, $a^{-m}=\frac{1}{a^m}$]

$\frac{1}{8}\times(3)^{-3}=\frac{1}{2^3}\times(3)^{-3}=2^{-3}\times3^{-3}=(2\times3)^{-3}=6^{-3}=\frac{1}{6^3}$

$(-3)^4\times\left(\frac{5}{3}\right)^4=(-1\times3)^4\times\frac{5^4}{3^4}=(-1)^4\times3^4\times\frac{5^4}{3^4}$

$=(-1)^4\times5^4=5^4$ $[(-1)^4=1]$

**उदाहरणम् 5** m इत्यस्य मानं जानन्तु यतो हि $(-3)^{m+1}\times(-3)^5=(-3)^7$

**समाधानम्** $(-3)^{m+1}\times(-3)^5=(-3)^7$

$(-3)^{m+1+5}=(-3)^7$

$(-3)^{m+6}=(-3)^7$

उभय पक्षतः घातानाम् आधारः समानः अस्ति यः 1 तथा -1 इत्यस्मात् भिन्नः अस्ति। अतः तस्य घाताङ्कः समानः भवितव्यः। अतः m+6=7 अथवा m=7-6=1

> $a^n=1$ यदि n=0अस्ति। a=1अथवा a=-1 एतत् अतिरिच्य कस्य अपि a इत्यस्य कृतेएतत् भविष्यति। a=1 इत्यस्य कृते $1^1=1^2=1^3=1^{1-2}=...=1$ अथवा $(1)^n=1$ असीमितं n इत्यस्य कृते a=-1 इत्यस्य कृते$(-1)^0=(-1)^2=(-1)=(-1)^{-2}=...=1$अथवा $(-1)^p=1$, p कश्चित् सम-पूर्णाङ्कस्य कृते।

**उदाहरणम् 6** $\left(\frac{2}{3}\right)^{-2}$ इत्यस्य मानं जानन्तु।

**समाधानम्** $\left(\frac{2}{3}\right)^{-2} = \frac{2^{-2}}{3^{-2}} = \frac{3^2}{2^2} = \frac{9}{4}$

$(\frac{2}{3})^{-2} = \frac{2^{-2}}{3^{-2}} = \frac{3^2}{2^2} = (\frac{3}{2})^2$

अतः साधारणतः, $(\frac{a}{b})^{-m} = (\frac{b}{a})^m$

**उदाहरणम् 7** सरलं कुर्वन्तु

(i) $\left\{\left(\frac{1}{3}\right)^{-2}-\left(\frac{1}{2}\right)^{-3}\right\} \div \left(\frac{1}{4}\right)^{-2}$  (ii) $\left(\frac{5}{8}\right)^{-7}\times\left(\frac{8}{5}\right)^{-5}$

**समाधानम्**

(i) $\left\{\left(\frac{1}{3}\right)^{-2}-\left(\frac{1}{2}\right)^{-3}\right\} \div \left(\frac{1}{4}\right)^{-2} = \left\{\frac{1^{-2}}{3^{-2}} - \frac{1^{-3}}{2^{-3}}\right\} \div \frac{1^{-2}}{4^{-2}}$

$= \left\{\frac{3^2}{1^2} - \frac{2^3}{1^3}\right\} \div \frac{4^2}{1^2} = \left\{9-8\right\} \div 16 = \frac{1}{16}$

(ii) $\left(\frac{5}{8}\right)^{-7}\times\left(\frac{8}{5}\right)^{-5} = \frac{5^{-7}}{8^{-7}} \times \frac{8^{-5}}{5^{-5}} = \frac{5^{-7}}{5^{-5}} \times \frac{8^{-5}}{8^{-7}} = 5^{(-7)-(-5)}\times 8^{(-5)-(-7)}$

$= 5^{-2}\times 8^{2} = \frac{8^2}{5^2} = \frac{64}{25}$

## प्रश्नावली 12.1

**1.** मानं जानन्तु :

(i) $3^{-2}$  (ii) $(-4)^{-2}$  (iii) $\left(\frac{1}{2}\right)^{-5}$

**2.** सरलं कुर्वन्तु तथा उत्तरं धनात्मक-घाताङ्करूपे व्यक्ती कुर्वन्तु।

(i) $(-4)^5\div(-4)^8$  (ii) $\left(\frac{1}{2^3}\right)^2$

(iii) $(-3)^4\times\left(\frac{5}{3}\right)^4$  (iv) $(3^{-7}\div 3^{-10})\times 3^{-5}$

(v) $2^{-3}\times(-7)^{-3}$

**3.** मानं जानन्तु :

(i) $(3^0+4^{-1})\times 2^2$  (ii) $(2^{-1}\times 4^{-1})\div 2^{-2}$

(iii) $\left(\frac{1}{2}\right)^{-2}+\left(\frac{1}{3}\right)^{-2}+\left(\frac{1}{4}\right)^{-2}$  (iv) $(3^{-1}+4^{-1}+5^{-1})^0$

(v) $\left\{\left(\frac{-2}{3}\right)^{-2}\right\}^2$

**4.** मानं जानन्तु -(i) $\frac{8^{-1}\times 5^3}{2^{-4}}$  (ii) $(5^{-1}\times 2^{-1})\times 6^{-1}$

**5.** m इत्यस्य मानं जानन्तु यस्य कृते $5^m \div 5^{-3} = 5^5$

**6.** मानं जानन्तु - (i) $\left\{\left(\frac{1}{3}\right)^{-1} - \left(\frac{1}{4}\right)^{-1}\right\}^{-1}$ (ii) $\left(\frac{5}{8}\right)^{-7} \times \left(\frac{8}{5}\right)^{-4}$

**7.** सरलं कुर्वन्तु।

(i) $\frac{25 \times t^{-4}}{5^{-3} \times 10 \times t^{-8}}$ $(t \neq 0)$ (ii) $\frac{3^{-5} \times 10^{-5} \times 125}{5^{-7} \times 6^{-5}}$

## 12.4 घाताङ्कानां प्रयोगं कृत्वा लघु-संख्याः मानकरूपे व्यक्तीकरणम्।

निम्न-तथ्यान् अवलोकयन्तु।

1. पृथिव्याः सूर्यस्य दूरी 149,600,000,000 मीटर-परिमितम् अस्ति।
2. प्रकाशस्य गतिः 300,000,000 m/s अस्ति।
3. VII कक्ष्यायाः गणितपुस्तकस्य स्थूलता 20mm अस्ति।
4. रक्त-रुधिर-कोशिकानां सामान्यः व्यासः 0.000007mm इति अस्ति।
5. मनुष्यस्य केशस्य स्थूलतायाः परास इति 0.005 सेण्टीमीटरतः 0.01 सेण्टीमीटरम् अस्ति।
6. पृथिव्याः चन्द्रमसः दूरी प्रायः 384,467,000 मीटर-पर्यन्तं भवति।
7. पादपानां कोशिकायाः आकारः 0.00001275 मीटर-पर्यन्तम् अस्ति।
8. सूर्यस्य सामान्य-त्रिज्या 695000 किलोमीटर इति अस्ति।
9. अन्तरिक्षशटले सघन-राकेट-बूस्टर इति प्रेरयितुं शटलस्य द्रव्यमानं 503600 किलोग्राम इति भवति।
10. एकस्य कागदस्य स्थूलता 0.0016 सेण्टीमीटर इति अस्ति।
11. संगणक-चिप इत्यस्य एकस्याः तन्त्र्याः व्यासः 0.000003 मीटर इति अस्ति।
12. माउण्ट-एवरेस्ट इत्यस्य औन्नत्यं 8848 मीटर इति अस्ति।

अत्र कासाञ्चन संख्यानाम् अवलोकनं कुर्वन्तु यत् वयं पठितुं शक्नुमः यथा 2 सेण्टीमीटर, 8848 मीटर, 6,95,000 किलोमीटर इति। अत्र काचन बृहत् संख्या अपि अस्ति यथा 150,000,000,000 मीटर तथा काचन बहु लघु-संख्याः सन्ति यथा 0.000007 मीटर इति।

उपर्युक्त-तथ्यानाम् आधारे बृहत्तमां लघुत्तमाञ्च संख्यां परिचिन्वन्तु तथा सङ्गत-सारण्यां लिखन्तु।

| बृहत्तमाः संख्याः | लघुत्तमाः संख्याः |
|---|---|
| 150,000,000,000 मीटर | 0.000007 मीटर |
| ................................ | ................................ |
| ................................ | ................................ |
| ................................ | ................................ |
| ................................ | ................................ |

गतकक्ष्यायां वयं शिक्षितवन्तः यत् काम् अपि लघुतमां संख्यां मानकरूपेण कथं व्यक्तीकरणं भवेत्। उदाहरणार्थं $150,000,000,000 = 1.5 \times 10^{11}$। इदानीम् अस्माभिः 0.000007 इति संख्या मानकरूपे व्यक्तीकरणीया।

$$0.000007 = \frac{7}{1000000} = \frac{7}{10^3} = 7 \times 10^{-6}$$

$$0.000007m = 7 \times 10^{-6}m$$

एवमेव एकस्य कागदस्य स्थूलता या 0.0016 सेण्टीमीटर इति अस्ति लिखन्तु।

$0.0016 = \frac{16}{10000} = \frac{1.6 \times 10}{10^4} = 1.6 \times 10 \times 10^{-4}$

$= 1.6 \times 10^{-3}$ सेमी

150000000000. दशमानः 11 स्थानानि वामतः अपसारितानि।
11 10 9 8 7 6 5 4 3 2 1

0.000007 दशमानः 6 स्थानानि दक्षतः अपसारितानि।
1 2 3 4 5 6

अतः वयंकथयितुं शक्नुमः यत् कर्गदस्य स्थूलता $=1.6 \times 10^{-3}$ सेमी अस्ति।

पुनः ध्यानं ददतु।
0.0016 दशमानं त्रीणि स्थानानि दक्षिणतः अपसारितानि।
1 2 3

**प्रयत्नं कुर्वन्तु**

1. निम्न-संख्याः मानकरूपेण लिखन्तु।
   (i) 0.000000564 (ii) 0.0000021 (iii) 21600000 (iv) 15240000
2. प्रदत्त-तथ्यान् मानकरूपेण लिखन्तु।

### 12.4.1 बृहत्तमसंख्यानां लघुतमसङ्ख्यानां च तोलनम्

सूर्यस्य व्यासः $1.4 \times 10^9$ मी तथा पृथिव्याः व्यासः $1.2756 \times 10^7$ मी अस्ति। वयम् एतेषां व्यासानां तोलनं कर्तुम् इच्छामः। सूर्यस्य व्यासः $1.4 \times 10^9$ मी पृथिव्याः व्यासः $1.2756 \times 10^7$ मी

अतः $\frac{1.4 \times 10^9}{1.2756 \times 10^7} = \frac{1.4 \times 10^{9-7}}{1.2756} = \frac{1.4 \times 100}{1.2756}$ यः प्रायः 100 गुणितम् अस्ति।

अतः सूर्यस्य व्यासः पृथिव्याः व्यासस्य प्रायः 100 गुणितम् अस्ति। रक्त-रुधिर-कोशिकाः या 0.000007 m इत्यस्य अस्ति तथा पादपानां कोशिकाः याः 0.00001275मी परिमापस्य अस्ति एतेषां परिमापानां तोलनं कुर्वन्तु।

रक्त-रुधिर-कोशिकानाम् आकारः $= 0.000007\text{m} = 7 \times 10^{-6}$ मी

पादपानां कोशिकानाम् आकारः $= 0.00001275\text{m} = 1.275 \times 10^{-5}$ मी

अतः $\frac{7 \times 10^{-6}}{1.275 \times 10^{-5}} = \frac{7 \times 10^{-6-(-5)}}{1.275} = \frac{7 \times 10^{-1}}{1.275} = \frac{0.7}{1.275} = \frac{0.7}{1.3} = \frac{1}{2}$ (प्रायः)

अतः रक्त-रुधिर-कोशिकाः आकारे पादपानां कोशिकायाः प्रायः अर्धभागः अस्ति।

पृथिव्याः द्रव्यमानं $5.97 \times 10^{24}$ किग्रा तथा चन्द्रमसः द्रव्यमानं $7.35 \times 10^{22}$ किग्रा अस्ति। उभयोः सम्पूर्णं द्रव्यमानं किं भविष्यति ?

सम्पूर्णं द्रव्यमानम् $= 5.97 \times 10^{24}$ kg+ $7.35 \times 10^{22}$ किग्रा

$= 5.97 \times 100 \times 10^{22} + 7.35 \times 10^{22}$

$= 597 \times 10^{22} + 7.35 \times 10^{22}$

$= (597 + 7.35) \times 10^{22} = 604.35 \times 10^{22}$ किग्रा

एतान् नियमान् भवन्तः सप्तम कक्ष्यायां धनात्मक-घाताङ्के अपि शिक्षितवन्तः।

सूर्यस्य पृथिव्याः च मध्ये दूरी $1.496 \times 10^{11}$ मी तथा पृथिवी-चन्द्रमसः मध्ये दूरी $3.84 \times 10^8$ किग्रा अस्ति। सूर्यग्रहणक्रमे चन्द्रमाः पृथिवी-सूर्ययोः मध्ये आगच्छति। अस्मिन् समये चन्द्र-सूर्ययोः मध्ये कियत् दूरी भविष्यति ?

सूर्यस्य पृथिव्याः च मध्ये दूरी $= 1.496 \times 10^{11}$ मी

पृथिवी-चन्द्रमसः मध्ये दूरी $= 3.84 \times 10^8$ मी

चन्द्र-सूर्ययोः मध्ये दूरी $= 1.496\times10^{11} - 3.84\times10^{8}$

$= 1.496\times1000\times10^{8} - 3.84\times10^{8}$

$= (1496-3.84)\times10^{8}$ मी $= 1492.16\times10^{8}$ मी

**उदाहरणम् 8** निम्न-संख्यानां मानकरूपे व्याख्यानं कुर्वन्तु।

(i) 0.000035 (ii) 4050000

**समाधानम्** (i) $0.000035 = 3.5\times10^{-5}$ (ii) $4050000 = 4.05\times10^{6}$

**उदाहरणम् 9** निम्न-संख्यां सामान्यरूपेण व्यक्तं कुर्वन्तु।

(i) $3.52\times10^{5}$ (ii) $7.54\times10^{-4}$ (iii) $3\times10^{-5}$

**समाधानम्**

(i) $3.5\times10^{5} = 3.5\times100000=352000$

(ii) $7.54\times10^{-4} = \frac{7.54}{10^{4}} = \frac{7.54}{10000} = 0.000754$

(iii) $3\times10^{-5} = \frac{3}{10^{5}} = \frac{3}{100000} = 0.00003$

एकवारं पुनः अस्माभिः मानकरूपे प्रदत्ताः संख्याः समान-घाताङ्कीय संख्यासु परिवर्तनीयाः।

## प्रश्नावली 12.2

**1.** निम्न-संख्याः मानकरूपे व्यक्तं कुर्वन्तु।

(i) 0.0000000000085 (ii) 0.00000000000942

(iii) 6020000000000000 (iv) 0.00000000837

(v) 31860000000

**2.** निम्न-संख्याः सामान्यरूपेण व्यक्तं कुर्वन्तु।

(i) $3.02\times10^{-6}$ (ii) $4.5\times10^{4}$ (iii) $3\times10^{-8}$

(iv) $1.0001\times10^{9}$ (v) $5.8\times10^{12}$ (vi) $3.61492\times10^{6}$

**3.** निम्नलिखित-कथनेषु या संख्या प्रकटीभवति ताः मानकरूपेण व्यक्तीकुर्वन्तु।

(i) 1 माईक्रॉन $\frac{1 \text{ मी}}{1000000}$ इत्यस्य समं भवति।

(ii) एकस्य इलेक्ट्रॉनयन्त्रस्य आवेशः 0.000,000,000,000,000,000,16 कुलम्बः भवति।

(iii) जीवाणोः मापनं 0.0000005 मी अस्ति।

(iv) पादपानां कोशिकानां परिमापनं 0.00001275 मी अस्ति।

(v) स्थूलकागदस्य स्थूलता 0.07 मीमी अस्ति।

**4.** एकस्मिन् चये पञ्च पुस्तकानि सन्ति यस्मिन् प्रत्येकं स्थूलता 20 मीमी तथा पञ्च कर्गदानां बन्धः अस्ति येषु प्रत्येकं स्थूलता 0.016 मीमी अस्ति। अस्य चयस्य सम्पूर्णां स्थूलतां जानन्तु।

## वयं किं चर्चितवन्तः ?

1. ऋणात्मक-घाताङ्कीय संख्याः निम्न-नियमान् पालयन्ति।

(a) $a^m\times a^n=a^{m+n}$ (b) $a^m\div a^n=a^{m-n}$ (c) $(a^m)^n = a^{mn}$

(d) $a^m\times b^m= (ab)^m$ (e) $a^0=1$ (f) $\frac{a^m}{b^m} = \left(\frac{a}{b}\right)^m$

2. ऋणात्मक-घाताङ्कानाम् उपयोगं कुर्वन्तः लघुतम-सङ्ख्याः मानकरूपेण व्यक्तीकर्तुं शक्नुवन्ति।